No. १२४१ क

Title दुर्गास्तोत्रम्

Author

Extent ३ पत्र Age

Subject स्तोत्र

दुर्गास्तोत्र
नं० १२५१

5701
F 3
complete

श्री स्तोत्र



दु॰ ॐश्रीगणेशायनमः लक्ष्मीशेयोगनिद्रांप्रभजतिभुज
१ गाधीशतल्पेसदर्पा उत्पन्नौदानवौतच्छ्रवणमलमयांगौ
मधुंकैटभंच दृष्ट्वाभीतस्यधातुःस्तुतिभिरभिनुतामाशुतौ
नाशयंतीं दुर्गांदेवींप्रपद्येशरणमहमशेषापदुन्मूलना
य १ युद्धेनिर्जित्यदैत्यःस्त्रिभुवनमखिलंयस्तदीयेषुधिष्ण्ये
ष्वास्थाप्यस्वानिधेयान्स्वयमगमदसौशक्रतांविक्रमेण तं
सामात्याप्तमित्रंमहिषमभिनिहत्यास्यमूर्द्धाधिरूढां दुर्गां।

देवींप्रपद्येशरणमहमशेषापदुन्मूलनाय २ विष्णोर्मति
प्रणाशस्थितिविलुलितपरेदेविघोरामरारि त्रासात्त्रातंजले
नःपुनरपिचमहासंकटेष्वीदृशेषु आविर्भूयाःपुरस्तादिति
चरणनमत्सर्वगीर्वाणवर्गां दुर्गांदेवींप्रपद्येशरणमहम।
शेषापदुन्मूलनाय ३ हन्तुंशुम्भंनिशुम्भंविबुधगणनुतांहेम
दोलांहिमाद्रा वारूढांव्यूढदर्पान्युधिनिहतवतींधूम्रदृक्चण्ड
मुण्डान् चामुण्डाख्यांदधानामुपशमितमहारक्तबीजोपसर्गां

दु. दुर्गांदेवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ४ ब्रह्मे
२ शस्कंदनारायणकिटिनरसिंहेन्द्रशक्तीः स्वभृत्याः कृत्वाह
त्वानिशुंभं जितविबुधगणं त्रासिताशेषलोकं एकीभूया
थशुंभं रणशिरसि निहत्यास्थितामात्तखड्गां दुर्गांदेवीं प्रपद्ये
शरणमहमशेषापदुन्मूलनाय ५ त्रायस्वस्वामिनीति त्रिभु
वनजननि प्रार्थना त्वय्यपार्था पाल्यंतेभ्यर्थनायां भगवति
शिशवः किंत्वदन्याजनन्या तत्तुभ्यं स्यान्नमस्येत्यवनतवि

बुधाह्लादिवीणाविसर्गां दुर्गां देवीं प्रपद्ये शरणमहमशेषा
पदुन्मूलनाय ८ त्रैगुण्यानां गुणानामनुसरणरतां केलितां
नावतारै त्रैलोक्यत्राणशीलां दनुजकुलवनीवह्निकीलां स
लीलां देवीं सच्चिन्मयीं तां विपुलितविनमत्सत्रिवर्गापवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ९ सिंहारू
ढां त्रिनेत्रां करतलविलसच्छङ्खचक्रासिरम्यां भक्ताभीष्टप्रदा
त्रीं त्रिभुवनजननीं सर्वलोकैकवंद्यां सर्वालंकारदीमां विश्व

दु. युतमुरुकंठाघणामलांगीकृपांगी दुर्गांदेवींप्रपद्येशरण
२ महमशेषापदुन्मूलनाय ७ पतत्संततःपठेतत्स्तवमखि
3 लविपज्जालतूलानलाभं हृन्मोहध्वांतभानुप्रतिममखि
लसंकल्पकल्पद्रुकल्पं दौर्गंदौर्गत्यघोरातपतुहिनकर
प्रख्यमंहोगजेंद्रश्रेणीपंचास्यदेशं विपुलभयदकाला
हितार्क्ष्यप्रतापं ८ इतिश्रीदुर्गास्तोत्रंसमाप्तम् ॥